**Series : MNL2K** **SET~4**

प्रश्न-पत्र कोड
Q.P. Code **65**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (सम्प्रेषणात्मकम्)

# SANSKRIT (Communicative)

*अवधि : होरात्रयम्*
*निर्धारित समय : 3 घण्टे*
*Time allowed : 3 hours*

*पूर्णाङ्काः : 80*
*अधिकतम अंक : 80*
*Maximum Marks : 80*

**नोट :**

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें ।**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

**NOTE :**

(I) Please check that this question paper contains **15** printed pages.

(II) Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) Please check that this question paper contains **18** questions.

(IV) **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

**General Instructions :**

*This question paper is divided into* ***four*** *sections.*

*It has total 18 questions.*

***Section 'A'*** *: 1 question no. 1.*

***Section 'B'*** *: 3 questions no. 2 to 4.*

***Section 'C'*** *: 7 questions no. 5 to 11.*

***Section 'D'*** *: 7 questions no. 12 to 18.*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

**सामान्य निर्देशा:**

*अस्मिन् प्रश्नपत्रे* ***चत्वार:*** *भागा: सन्ति ।*

*अस्मिन् प्रश्नपत्रे* ***अष्टादश (18)*** *प्रश्ना: सन्ति ।*

***भाग: 'क'*** *– 1 – प्रश्नसंख्या 1.*

***भाग: 'ख'*** *– 3 – प्रश्नसंख्या 2 – 4.*

***भाग: 'ग'*** *– 7 – प्रश्नसंख्या 5 – 11.*

***भाग: 'घ'*** *– 7 – प्रश्नसंख्या 12 – 18.*

*विशिष्टनिर्देशानुसारं प्रश्ना: समाधेया: ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वम् सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

## भाग: 'क' *[10 अङ्का:]*

## अपठितावबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

भारतदेश: कृषिप्रधान: देश: अस्ति अत: भारतीयसमाजे कृषक: प्रमुखतम: स्तम्भ: इव स्थित: अस्ति । कृषका: प्रात:काले एव उत्थाय घर्मवृष्टिशीतवातादीन् सहमाना: अनवरतं परिश्रमं कुर्वन्ति । ते भूमे: गर्भे बीजानि आरोपयन्ति, तदनन्तरं वृषभै: यन्त्रै: च भूमे: सम्यक् कर्षणं कृत्वा सिञ्चनकार्ये संलग्ना: भवन्ति । वर्षाकाले मेघानां प्रसादेन धान्यलक्ष्मीरिव भूमि: सुशोभिता भवति । शरद्-ऋतौ सुवर्णवर्णै: शस्यशालिभि: क्षेत्राणि रमणीयानि दृश्यन्ते । यद्यपि कृषकस्य श्रमेण राष्ट्रस्य अन्नपूरणं, वस्त्रपूरणं जीवनधारणं च साध्यते, तथापि कृषक: स्वयं दारिद्र्यपीडितं जीवनं यापयति । कदापि अतिवृष्ट्या अनावृष्ट्या वा सम्पूर्णं शस्यं विनश्यति, विपणौ अपि स: न्यूनमूल्यं लभते ऋणभार: च कृषकान् दु:खेन पीडयति । तथापि कृषका: धैर्यं न त्यजन्ति, अपितु पूर्णनिष्ठया स्वकर्म कुर्वन्त: समाजस्य पालनं कुर्वन्ति । एतदर्थम् 'अन्नदाता' इति विशेषणेन कृषक: सम्माननीय: । यदि कृषका: न स्यु:, तर्हि मानवसमाजस्य जीवितं असम्भवमेव भवेत् । अत: वयं कृषकाणां श्रमस्य, त्यागभावनाया: धैर्यस्य च सम्मानं कुर्याम । राष्ट्रस्य मेरुदण्ड:, समाजस्य जीवनप्राण:, संस्कृते: रक्षका: च कृषका: एव ।

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 1=2$

(i) भारतदेश: कीदृश: देश: अस्ति ?

(ii) केन विशेषणेन कृषक: सम्माननीय: ?

(iii) वर्षाकाले केषां प्रसादेन धान्यलक्ष्मीरिव भूमिः सुशोभिता भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 2=4$

(i) किं किं कृषकान् दुःखेन पीडयति ?

(ii) कृषका: कदा सिञ्चनकार्ये संलग्ना: भवन्ति ?

(iii) वयं कस्य सम्मानं कुर्याम ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। $1 \times 1=1$

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्) $3 \times 1=3$

(i) 'कृषक: स्वयं दारिद्र्यपीडितजीवनं यापयति' अत्र किं क्रियापदम् ?

(A) कृषक: (B) स्वयम्

(C) यापयति (D) दारिद्र्यपीडितजीवनं

(ii) 'अनवरतम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) कृषक: (B) परिश्रमं

(C) रक्षका: (D) न्यूनमूल्यम्

(iii) 'वर्षा' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(A) वृष्टि: (B) घर्म:

(C) मेघानाम् (D) शस्यम्

(iv) 'ते भूमे: गर्भे बीजानि आरोपयन्ति' अत्र किं कर्तृपदम् ?

(A) भूमे: (B) ते

(C) गर्भे (D) बीजानि

[15 अङ्काः]

## भागः 'ख'
## रचनात्मकं-कार्यम्

**2.** भवान् पीयूषः स्वपितरं प्रति पत्रं लिखति। एतत् पत्रं मञ्जूषायाः उचितैः पदैः पूरयित्वा पुनः लिखत : $10\times\frac{1}{2}=5$

गङ्गा-छात्रावासः,

(i) ____________

पूज्याः पितृमहोदयाः,

(ii) ____________ ।

अत्र सर्वगतं (iii) ____________ । आशासे त्वम् अपि कुशली। मया गतसप्ताहे एव भवतः पत्रं प्राप्तम्। इदं ज्ञात्वा अहम् अतिप्रसन्नः अस्मि यद् सम्प्रति मातुः स्वास्थ्यम् उत्तमं जातम्। अहमपि भवन्तं मम उपलब्धीनां विषये सूचयितुम् इच्छामि । ह्यः अन्तर्विद्यालयीय-गायनप्रतियोगितायाम् अहं (iv) ____________ स्थानं प्राप्तवान् । क्रीडादिवसे अपि धावनप्रतियोगितायाम् अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवेऽपि अहं नाट्याभिनयं (v) ____________ । अयं वार्षिकोत्सवः शनिवासरे (vi) ____________ । विद्यालयस्य पक्षतः ह्यः एव (vii) ____________ प्रेषितम् । अहमपि (viii) ____________ प्रार्थयामि यत् भवान् मात्रा सह अवश्यम् आगच्छतु। मम (ix) ____________ भविष्यति। अहं प्रतीक्षां करिष्यामि।

मातृचरणयोः मम प्रणामाः।


भवदीयः पुत्रः

(x) ____________ ।

**मञ्जूषा**

| |
|---|
| भवन्तम्, करिष्यामि, पीयूषः, उत्साहवर्धनम्, सादरचरणस्पर्शः, आयोजयिष्यते, प्रथमम्, कुशलम्, निमन्त्रणपत्रम्, नवदिल्लीतः। |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

| |
|---|
| रक्तदुर्गम्, गौरवम्, दिल्लीनगरम्, सैनिकाः, आरोहन्ति, विशालम्, पश्यन्ति, जनाः, वृक्षाः, ध्वजारोहणम्, प्रसन्नतया, शोभन्ते, हस्तेषु, राष्ट्रस्य, दृश्यते। |

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत। *5×1=5*

**'गणतन्त्रदिवसः'**

**मञ्जूषा**

| |
|---|
| वीरबालकाः, गौरवम्, दिल्लीनगरे, सैनिकाः, आरोहन्ति, पश्यन्ति, जनाः, ध्वजारोहणम्, प्रसन्नतया, राष्ट्रस्य, दृश्यते, राज्यस्य, नृत्यन्ति। |

**4.** अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत : $10\times\frac{1}{2}=5$

एकस्य कृषकस्य (i) ________ पुत्राः आसन्। ते चत्वारोऽपि भ्रातरः परस्परं (ii) ________ कुर्वन्ति स्म। तेषां चतुर्णां भ्रातॄणां कलहं दृष्ट्वा सः (iii) ________ दुखी आसीत्। एकदा सः शुष्ककाष्ठानि एकत्रीकृत्य तानि (iv) ________ बद्ध्वा पुत्राणां समक्षम् अस्थापयत्। सः कृषकः तान् पुत्रान् अवदत् – एतानि काष्ठानि त्रोटयत। पुत्रेषु एकः अपि तानि (v) ________ समर्थः नाभवत्। तदा सः पृथक्कृत्य पुत्राणां समक्षं पुनः एकैकं काष्ठम् (vi) ________ । सर्वे पुत्राः (vii) ________ सर्वाणि काष्ठानि अत्रोटयन्। सः (viii) ________ अकथयत् – यदि इत्थमेव यूयम् अपि परस्परं मिलित्वा (ix) ________ तर्हि कोऽपि युष्मान् हन्तुं समर्थः न भविष्यति। यतो हि (x) ________ शक्तिः कलौ युगे।

**मञ्जूषा**

| |
|---|
| निवत्स्यथ, चत्वारः, कृषकः, त्रोटयितुम्, कलहं, संघे, अस्थापयत्, रज्ज्वा, पुत्रान्, सरलतया। |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत : *5×1=5*

*माता* – पुत्र ! त्वं कुत्र गच्छसि ?

*पुत्रः* – मातः ! (i) ______________________________ ।

*माता* – परम् अद्य क्रीडायै न गन्तव्यम् ।

*पुत्रः* – किमर्थम् ? अयं तु मम खेलनस्य समयः अस्ति ।

*माता* – (ii) ______________________________ ।

*पुत्रः* – जन्माष्टमी किं भवति ?

*माता* – 'जन्माष्टमी' दिवसे एव श्रीकृष्णस्य जन्म अभवत् अतः सम्पूर्णे देशे भगवतः जन्मदिवसः उल्लासेन मान्यते ।

*पुत्रः* – (iii) ______________________________ ।

*माता* – अद्यैव मन्दिराणि पुष्पैः विद्युद्दीपकैः च सज्जितानि भवन्ति ।

*पुत्रः* – (iv) ______________________________ ।

*माता* – शीघ्रं सज्जः भवतु । चलामः ।

*पुत्रः* – (v) ______________________________ ।

**मञ्जूषा**

- अहं मित्रैः सह क्रीडितुं गच्छामि ।
- अहम् अति उत्सुकः अस्मि ।
- मन्दिराणां शोभा वस्तुतः मनोहारिणी दर्शनीया च भवति ।
- अहं जानामि परन्तु अद्य जन्माष्टमी अस्ति; अतः वयं मन्दिरं गमिष्यामः ।
- अहो ! श्रीकृष्णस्य जन्मोत्सवः । सः तु मम प्रियः ।

भागः 'ग' [25 अङ्काः]

## अनुप्रयुक्त-व्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) यः सोढुं शक्नोतीह + एव।

(ii) षडेते पाठका गुणाः।

(iii) सरस्तीरे विहरति मयि केनापि कर्कशैः शब्दैः वातावरणम् आकुलीक्रियते।

(iv) तदेतद् राजभवनं परित्यज्य वनं गच्छामः।

(v) अधुना रमणीया सृष्टिः + एषा।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) अनिच्छन् अपि वार्ष्णेय बलादिव नियोजितः।

(A) अन् इच्छन् (B) न इच्छन्

(C) अनि इच्छन् (D) अनि + च्छन्

(ii) अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्।

(A) जगत् प्रसिद्धम् (B) जगतः प्रसिद्धम्

(C) जगति प्रसिद्धम् (D) जगतप्रसिद्धम्

(iii) मयूरः साट्टहासं प्रविशति।

(A) अट्टहासेन सह (B) अट्टहासे सह

(C) अट्टहासं सह (D) अट्टहासयोः सह

(iv) शक्रः तत् नेत्रं यथास्थानम् स्थापितवान्।

(A) उचितं स्थानम् (B) यथा स्थानम्

(C) स्थानस्य पश्चात् (D) स्थानम् अनतिक्रम्य

(v) यूयं कथम् अस्मिन् नतं च उन्नतं च तस्मिन् मार्गे गच्छथ ?

(A) नतोन्नतम् (B) नतोन्नतयोः

(C) नतोन्नते (D) नतोन्नतौ

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) केचन च <u>पञ्चत्वं</u> गता ।

(A) पञ्च + तल्

(B) पञ्च + त्व

(C) पञ्च + ठक्

(D) पञ्च + मतुप्

(ii) अस्माभिः गुरूणाम् आदेशपालनं <u>कृ + तव्यत्</u> ।

(A) कर्तव्यानि

(B) कर्तव्यम्

(C) कर्तव्यानाम्

(D) कर्तव्या

(iii) तत्र राजहंसः <u>हंसी</u> च विहरतः ।

(A) हंस + टाप्

(B) हंस + मतुप्

(C) हंस + ङीप्

(D) हंस + ठक्

(iv) एषा सृष्टिः <u>रमणीय + टाप्</u> अस्ति ।

(A) रमणीयः

(B) रमणीयता

(C) रमणीया:

(D) रमणीया

(v) [illegible]ताम् <u>हृद् + ठक्</u> अभिनन्दनम् अस्ति ।

(A) [illegible]र्दिकः

(B) [illegible]र्दिकी

(C) [illegible]म्

(D) [illegible]म्



[]

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : (केवलं प्रश्नत्रयम्) 3×1=3

*नमनः* – हे दीप ! किं त्वम् अद्य 'रामायणम्' इति नाटकं द्रष्टुं गच्छसि ?

*दीपः* – न, न (i) __________ तत् नाटकं द्रष्टुं न गच्छामि ?

*नमनः* – किं कारणम् ! अद्य त्वं किं (ii) __________ ?

*दीपः* – अधुना (iii) __________ गृहकार्यं पूर्णं क्रियते ।

*नमनः* – मया तु अधुना एकः (iv) __________ लिख्यते अनन्तरं च नाटकं द्रष्टुं गम्यते ।

*दीपः* – अस्तु ! तर्हि अहमपि शीघ्रं गृहकार्यं समापयामि । अनन्तरं त्वया सह आगमिष्यामि ।

*नमनः* – अस्तु । पुनर्मिलामः ।

**मञ्जूषा**

| लेखः, मया, अहम्, करोषि। |
|---|

9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत : (केवलं प्रश्नत्रयम्) 3×1=3

(i) अहं __________ वादने (5:30) भ्रमणाय उपवनं गच्छामि ।

(ii) __________ वादने (6:00) भ्रमणं कृत्वा गृहम् आगच्छामि ।

(iii) ततः स्नानं कृत्वा __________ वादने (8:45) कार्यालयं गच्छामि ।

(iv) तत्पश्चात् अहं अपराह्णे __________ वादने (7:15) गृहम् आगच्छामि ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) सः बाल्यात् __________ वृद्धोपसेवी विनयशीलः च आसीत् ।

(ii) अवक्रता यथा चित्ते __________ वाचि भवेत् यदि ।

(iii) __________ अपि आणविक-अस्त्राणि आसन् ।

(iv) एतत् तु 'फरवरी' __________ मासे मान्यते ।

(v) __________ वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः ।

**मञ्जूषा**

| पुरा, सम्प्रति, इति, एव, तथा। |
|---|

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत : (केवलं प्रश्नत्रयम्) $3\times1=3$

(i) स: महिला कानने व्याघ्रं ददर्श।

(A) तत्

(B) सा

(C) ते

(D) ता:

(ii) अहो ! विचित्रं स्वप्न: मया दृष्ट:।

(A) विचित्रा

(B) विचित्रम्

(C) विचित्र:

(D) विचित्राणि

(iii) अलम् अतिविकत्थनम्।

(A) अतिविकत्थनेन

(B) अतिविकत्थनान्

(C) अतिविकत्थनाय

(D) अतिविकत्थने

(iv) रागसमं दुखं न सन्ति।

(A) आसन्

(B) स्त:

(C) आस्ताम्

(D) अस्ति

## भागः 'घ' [30 अङ्काः]

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म। अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत्-मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कः शिवीनां राजा अभवत् ?

(ख) राजा कथं प्रजाः पालयति स्म ?

(ग) विरलसङ्ख्या केषाम् अभवत् ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) राजा बाल्यात् एव कीदृशः आसीत् ?

(ख) जनाः किमर्थं तं देशम् आयान्ति स्म ?

(ग) दानशालासु विचरन् स राजा किम् अचिन्तयत् ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'असौ पुत्रवत् प्रजाः पालयति स्म' अत्र किं क्रियापदं प्रयुक्तम् ?

(ख) 'भगवान्' इति विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम् ?

(ग) 'वस्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते॥
य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) मन्त्री कैः न परिभूयते ?

(ख) मनुष्यः आत्मनः किम् इच्छति ?

(ग) मनुष्यः कीदृशं कर्म न कुर्यात् ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) यः आत्मनः श्रेयः इच्छति, स किं न कुर्यात् ?

(ख) मन्त्री कीदृशः भवेत् ?

(ग) मन्त्री कुत्र अकातरः भवेत् ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'स केनापि प्रकारेण परैर्न परिभूयते' अत्र वाक्ये कर्तृपदं किम् ?

(ख) 'दुःखानि' इत्यस्य किं विपर्ययपदं प्रयुक्तम् ?

(ग) 'धैर्यवान्' इत्यस्य विशेष्यपदं चित्वा लिखत ।

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 5

*राजीवः* – किम् एतत् कस्यचित् दुर्गस्य चित्रम् ?

*पर्यटनाधिकारी* – आम् । एतत् दिवांग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम् ! अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः परिचायकाः । अधुना इदं चित्रं पश्यत ।

*शैलेशः* – अहं जानामि इदं स्थानम् । इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठः ।

*पर्यटनाधिकारी* – सम्यक् अभिज्ञातम् ! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः । पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम् । लोहितजनपदे अपि अनेकबौद्धविहाराः सन्ति । https://www.cbseboardonline.com

*नीलिमा* – मान्यवर ! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम् । किम् इदम् ?

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) भीष्मकनगरदुर्गम् कस्मिन् मण्डले स्थितम् ?

(ख) कस्मिन् जनपदे अनेके बौद्धविहाराः सन्ति ?

(ग) कस्य अवशेषाः आर्यकला-संस्कृति-सम्पदः परिचायकाः सन्ति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) प्रसिद्धः बौद्धमठः कः वर्तते ?

(ख) भीष्मकनगरदुर्गस्य अवशेषाः केषां परिचायकाः सन्ति ?

(ग) अरुणाचलप्रदेशे 'परशुरामकुण्डम्' किम् अस्ति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2 \times 1 = 2$

(क) नाट्यांशे 'सन्ति' इति क्रियायाः कर्तृपदं किम् ?

(ख) 'अधुना इदं चित्रं पश्यत ।' अत्र 'चित्रम्' विशेष्यपदस्य विशेषणपदं किम् ?

(ग) 'राजते अयं बौद्धमठः ।' अस्मिन् वाक्ये क्रियापदं किम् ?

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं पञ्चप्रश्नाः) $5 \times 1 = 5$

(i) शक्रः नेत्रहीनयाचकस्य रूपं धारयति ।

(ii) मेषः अर्धज्वलितकाष्ठेन ताडितः ।

(iii) मनः चञ्चलं भवति ।

(iv) न जानाति भवान् द्रौणेः चपलां प्रकृतिम् ।

(v) राजा याचकेभ्यः दानं ददाति ।

(vi) आचार्यः पुत्रं सावधानम् अकरोत् ।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : $4 \times \frac{1}{2} = 2$

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

**अन्वयः**

(i) ________ चक्षुः न अस्ति, सत्यसमं तपः न (ii) ________ , रागसमं (iii) ________ न अस्ति, त्यागसमं सुखं (iv) ________ अस्ति ।

**मञ्जूषा**

| अस्ति, न, दुःखम्, विद्यासमम् । |
|---|

**अथवा**

श्लोकस्य भावार्थं मञ्जूषाया: सहायतया रिक्तस्थानानि पूरयन्तु : $4\times\frac{1}{2}=2$

चञ्चलं हि मन: कृष्ण ! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

**भावार्थ :**

श्रीकृष्णस्य वार्तां श्रुत्वा पुन: अर्जुन: वदति – हे (i) ________ ! मन: अतीव (ii) __________ , शरीरस्य मथनकर्ता अतीव बलवान् अपि च अस्ति । अत: तस्य (iii) __________ वायो: इव (iv) _________ मन्ये।

**मञ्जूषा**

| चञ्चलम्, नियन्त्रणम्, कठिनम्, कृष्ण। |
|---|

17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत :
(केवलं प्रश्नचतुष्टयम्) $4\times1=4$

(i) अस्माकं ऐक्यं तु जगत्प्रसिद्धम्।
(A) एकता (B) एकम्
(C) शत्रुता (D) सरलता

(ii) बोधिसत्वम् अमात्या: अवदन्।
(A) मातर: (B) मन्त्रिण:
(C) राजा (D) प्रजा:

(iii) पादं शिष्य: स्वमेधया।
(A) पादप: (B) वृक्ष:
(C) चरणम् (D) चतुर्थांशम्

(iv) नास्ति विद्यासमं चक्षु:।
(A) छत्रम् (B) नेत्रम्
(C) पुस्तकम् (D) शिक्षणम्

(v) अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।
(A) अर्जुन (B) कृष्ण
(C) क्रोध (D) मन:

**18.** अधोलिखितां कथां मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत : $8\times\frac{1}{2}=4$

भूपतेः (i) __________ पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म । राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया (ii) __________ प्रविश्य भोजनं खादति स्म । सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा (iii) __________ वानरान् राजभवनं त्यक्तुम् अकथयत् । (iv) __________ मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुं न स्वीकृतवन्तः । अन्यस्मिन् अहनि स मेषः (v) __________ अर्धज्वलितकाष्ठेन ताडितः । ज्वलन् स मेषः (vi) __________ प्रविष्टः । परिणामतः दग्धाः (vii) __________ प्राणत्राणाय अधावन् । राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत् । भयत्रस्ताः कपयः गुरुजनोपदेशस्य अवधीरणातः (viii) __________ कृतवन्तः ।

**मञ्जूषा**

| |
|---|
| अश्वाः, वानरयूथपः, पश्चात्तापम्, अश्वशालाम्, रसनास्वादलुब्धाः, चन्द्रस्य, सूपकारेण, महानसम् । |